बुद्धियोगः । सामर्थ्यम् । निर्गतिः । इति माघटीकाधृतवैजयन्ती ॥ प्रत्युपकारः । विनिमयः । यथा, माघे । १ । ५० ।

"बसतृचिपन् यः पृथिवीभृतामरं
वरप्रदानस्य चकार शूलिनः ।
ससत्तुषाराद्रिसुतासससम्भ्रम-
स्वयंग्रहाश्लेषसुखेन निष्क्रयम् ॥"

(विक्रयः । यथा, मनुः । ९ । ४६ ।
"न निष्क्रयविसर्गाभ्यां भर्त्तुर्भार्य्या विमुच्यते ॥")

निष्क्रान्तः, त्रि, (निर् + क्रम + क्तः ।) निर्गतः । यथा, मार्कण्डेये । ८७ । ५ ।
"भ्रुकुटीकुटिलात्तस्या ललाटफलकाद्द्रुतम् ।
काली करालवदना विनिष्क्रान्तासिपाशिनी ॥"
(यथाच, महाभारते । १३ । २ । ४५ ।
"निष्क्रान्ते मयि कल्याणि तथा सन्निहितेऽनघे ।
नातिवर्त्तेऽवमन्तव्यः प्रमाणं यद्यहं तव ॥")

निष्क्रियं, क्ली, (निर्गता क्रिया यस्य ।) ब्रह्म । यथा, वेदान्तसूत्रभाष्यम् ।
"निष्क्रियं निर्गुणं शान्तं निरपेक्षं निरञ्जनम् ॥"
क्रियाशून्ये, त्रि । यथाह कश्चित् ।
"बन्धनानि यदि सन्ति बहूनि
प्रेमरज्जुकृतबन्धनमन्यत् ।
दारुभेदनिपुणोऽपि षडङ्घ्रि-
र्निष्क्रियो भवति पङ्कजबद्धः ॥"

निष्क्वाथः, पुं, (निःसृतः क्वाथो यत्र ।) मांसादिक्वाथः । झोल इति भाषा । तत्पर्य्यायः । रसकः २ । इति हेमचन्द्रः । ३ । ७७ ॥

निष्ट्यः, पुं, (वर्णाश्रमादिभ्यो निर्गतः । निस् + "अव्ययात् त्यप् ।" ४ । २ । १०४ । इत्यस्य "निसो गते ।" इति वार्त्तिकोक्त्या त्यप् । "ह्रस्वात्तादौ तद्धिते ।" ८ । ३ । १०१ । इति षत्वम् ।) म्लेच्छजातिविशेषः । इति हेमचन्द्रः । ५ । ५९८ ॥ (पुत्रादिः । इति महीधरः । यथा, वाजसनेयसंहितायाम् । ५ । २३ ।
"यं मे निष्ट्यो यममात्यो निचखान ॥"
"ष्टै ष्ट्यै शब्दसंघातयोः । नितरां स्त्यायति संघातरूपेण यत्र वर्त्तते इति निष्ट्यः । यद्वा, निर्गत्य शरीरात् स्त्यायति विस्तीर्णो भवतीति निष्ट्यः पुत्रादिः । यद्वा, निर्गतो वर्णाश्रमेभ्यो निष्ट्यश्चाण्डालादिः । निसो गते इति वार्त्तिकेन निस उपसर्गाद्गतार्थे त्यप् इति काशिकायाम् ।" इति तत्र वेददीपः ॥)

निष्ठः, त्रि, (नितरां तिष्ठतीति । नि + स्था + कः ।) स्थितः । नितिष्ठतीति स्थाधातोर्डप्रत्ययनिष्पन्नः ॥

निष्ठा, स्त्री, (नितरां तिष्ठतीति । नि + स्था + "आतश्चोपसर्गे ।" ३ । १ । १३६ । इति कः । "उपसर्गादिति ।" ८ । ३ । ६५ । इति षत्वम् ततष्टाप् ।) निष्पत्तिः । नाशः । (यथा, भागवते । ५ । १२ । ८ ।
"यदा क्षितावेव चराचरस्य
विदाम निष्ठां प्रभवञ्च नित्यम् ॥")

अन्तः । निर्वहणम् । इत्यमरः । ३ । ३ । ४० ॥ याच्ञा । इति मेदिनी । ठे, ६ ॥ क्तक्तवतू प्रत्ययौ । इति कविकल्पद्रुमटीकायां दुर्गादासः ॥ (यथा, "क्तक्तवतू निष्ठा । १ । १ । २६ । एतौ निष्ठासंज्ञौ स्तः ।" इति सिद्धान्तकौमुदी ।) धर्म्मादौ श्रद्धा । यथा,—
"निष्ठया हि प्रतिष्ठा स्यादनिष्ठस्य कुतः फलम् ।
प्राप्नोति नैष्ठिकः स्वीयं धर्म्मं त्रातुं न चेतरः ॥
एकस्य देवस्य विहाय मन्त्र-
मेकं परश्चेद्भजतेऽपि तस्य ।
तदा भवेन्मन्त्रगुरुर्नैष्ठिकत्वा-
न्निष्ठाविहीनस्य न क्वापि सिद्धिः ॥"
इति वैद्यकुलतत्त्वे भरतमल्लिकः ॥
प्राप्यम् । यथा,—
"भगवन्तं हरिं प्रायो न भजन्त्यात्मवित्तमाः ।
तेषामशान्तकामानां का निष्ठा विजितात्मनाम् ॥")
इति श्रीभागवतैकादशस्कन्धपञ्चमाध्यायश्लोकटीकाव्याख्यायां श्रीधरस्वामी ॥ (नि + स्था + क्विप् । स्थितिः । यथा, ऋग्वेदे । ३ । ३१ । १० ।
"जाते निष्ठामदधुर्गोषु वीरान् ॥"
"निष्ठां पूर्व्वं यथास्थितिम् ।" इति सायनः ॥)

निष्ठानं, क्ली, (नि + स्था + करणे ल्युट् ।) व्यञ्जनम् । इत्यमरः । ३ । ३ । ११५ ॥ (यथा, रामायणे । २ । ९१ । ६७ ।
"व्यञ्जनैश्चापि च वाराहैर्निष्ठानवरसञ्चयैः ।
फलनिर्य्यूहसंसिद्धैः सूपैर्गन्धरसान्वितैः ॥")

निष्ठितं, त्रि, (नि + स्था + क्तः ।) नितरां स्थितम् । यथा, भागवते । २ । ७ । ३६ ।
"देवद्विषां निगमवर्त्मनि निष्ठितानां
पूर्भिर्मयेन विहिताभिरदृश्यतूर्भिः ।
लोकान् घ्नतां मतिविमोहमतिप्रलोभं
वेशं विधाय बहुभाष्यत औपधर्म्म्यम् ॥"
"देवद्विषां दैत्यानां निष्ठितानां नितरां स्थितानाम् ।" इति श्रीधरस्वामी ॥ (निष्ठा जातास्येति । तारकादित्वादितच् ।) निष्ठाविशिष्टः । निश्चयेन स्थितश्च ॥ (सम्यक्ज्ञाता । यथा, रामायणे । १ । १ । १४ ।
"रक्षिता स्वस्य धर्म्मस्य स्वजनस्य च रक्षिता ।
वेदवेदाङ्गतत्त्वज्ञो धनुर्व्वेदे च निष्ठितः ॥")

निष्ठीवः, पुं, (नि + ष्ठिव + भावे घञ् । पृषोदरादित्वात् दीर्घः ।) निष्ठीवनम् । इति हिरूपकोषः ॥ (यथाह वाभटः ।
"निष्ठीवः पार्श्वतो याचादेकस्यास्त्वो निमीलनम् ॥")

निष्ठीवनं, क्ली, (नि + ष्ठिव + भावे ल्युट् । ष्ठिवुसिवोर्ल्युटि दीर्घो वेति स्वामी । पृषोदरादित्वादिति मुकुटः ।) श्लेष्मादीनां मुखेन वमनम् । थूथू इति थुथु इति च भाषा ॥ तत्पर्य्यायः । निष्ठेवः २ निष्ठ्यूतिः ३ निष्ठेवनम् ४ । इत्यमरः । २ । ६ । ६८ ॥ निष्ठेवा ५ । निष्ठेवम् ६ । इति तट्टीका ॥ (यथा, मार्कण्डेयपुराणे । ३४ । ७० ।

"क्षुतेऽवलीढे वान्ते च तथा निष्ठीवनादिषु ।
कुर्य्यादाचमनं स्पर्शं गोपृष्ठस्यार्कदर्शनम् ॥")

निष्ठुरं, त्रि, (नि + स्था + मद्गुरादयश्चेति उरच् ।) परुषम् । कठिनम् । इत्यमरः । ३ । १ । ७६ ॥ (यथा, माघे । ५ । ४९ ।
"जग्मे जनैर्मुकुलिताक्षमनाददाने
संरब्धहस्तिपकनिष्ठुरचोदनाभिः ॥")

निष्ठ्यूतं, त्रि, (नि + ष्ठिव् + क्तः । "च्छ्वोः शूडिति ।" ६ । ४ । १९ । इत्यूठ् ।) क्षिप्तम् । इत्यमरः । ३ । १ । ८७ ॥

निष्ठ्यूतिः, स्त्री, (नि + ष्ठिव् + क्तिन् । "च्छ्वोः शूडिति ।" ६ । ४ । १९ । इत्यूठ् ।) निष्ठीवनम् । इत्यमरः । २ । ६ । ६८ ॥

निष्ठेवः, पुं, (नि + ष्ठिव् + घञ् ।) निष्ठीवनम् । इत्यमरः । २ । ६ । ६८ ॥

निष्ठेवनं, क्ली, (नि + ष्ठिव् + भावे ल्युट् ।) निष्ठीवनम् । इत्यमरः । २ । ६ । ६८ ॥

निष्णातः, त्रि, (नितरां स्नाति स्मेति । नि + स्ना + क्तः । "निनदीभ्यां स्नातेः कौशले ।" ८ । ३ । ८९ । इति षत्वम् ।) विज्ञः । निपुणः । इत्यमरः । ३ । १ । ४ ॥ (यथा, सुश्रुते सूत्रस्थाने तृतीयेऽध्याये ।
"यस्तु कर्म्मसु निष्णातो धार्ष्ट्याच्छास्त्रबहिष्कृतः ।
स सत्सु पूजां नाप्नोति वधञ्चार्हति राजतः ॥")
पारं गतः । यथा, भागवते १ । ४ । २१ ।
"वैशम्पायन एवैको निष्णातो यजुषामुत ॥"

निष्पक्वं, त्रि, (नितरां पक्वम् ।) अतिपाकयुक्तजलदुग्धादि । इति भरतः ॥ तत्पर्य्यायः । क्वथितम् २ । इत्यमरः । ३ । १ । ९५ ॥ पक्वताशून्यञ्च ॥

निष्पताकध्वजः, पुं स्त्री, राज्ञां पताकाशून्यरथविशेषः । इति युक्तिकल्पतरुः ॥ तद्विवरणं ध्वजशब्दे द्रष्टव्यम् ॥

निष्पत्तिः, स्त्री, (निर् + पद + क्तिन् ।) समाप्तिः । सिद्धिः । यथा,—
"क्रियायाः परिनिष्पत्तिर्यद्व्यापारादनन्तरम् ।
विवक्ष्यते यदा तत्र करणत्वं तदा स्मृतम् ॥"
इति रामतर्कवागीशधृतकारिका ॥
(नादस्यावस्थाविशेषः । यथा, हठयोगप्रदीपिकायाम् । ४ । ६९ ।
"आरम्भश्च घटश्चैव तथा परिचयोऽपि च ।
निष्पत्तिः सर्व्वयोगेषु स्यादवस्थाचतुष्टयम् ॥"
तथा, तत्रैव । ४ । ७६ ।
"रुद्रग्रन्थिं यदा भित्त्वा सर्व्वपीठगतोऽनिलः ।
निष्पत्तौ वैणवः शब्दः क्वणद्वीणाक्वणो भवेत् ॥")

निष्पत्राकृतिः, स्त्री, (निष्पत्र + कृ + भावे क्तिन् + डाच् ।) सपत्राकृतिः । अत्यन्तपीडा । इति हेमचन्द्रः । ६ । ८ ॥

निष्पत्रिका, स्त्री, (निष्पत्रमस्या अस्तीति । ठन् ।) करीरवृक्षः । इति राजनिर्घण्टः ॥

निष्पदयानं, क्ली, (निष्पदं पदरहितं यानम् ।) पदरहितवाहनम् । तच्च नौकादिकम् । इति